International Journal of Sanskrit Research 2021; 7(6): 185-190

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(6): 185-190
© 2021 IJSR
www.anantaajournal.com
Received: 28-09-2021
Accepted: 30-10-2021

**आवीरलालगङ्गोपाध्यायः**
शोधच्छात्रः, स्कृताध्ययनविभागः,
हैदराबादविश्वविद्यालयः, हैदराबाद,
तेलंगाना, भारत

Corresponding Author:
**आवीरलालगङ्गोपाध्यायः**
शोधच्छात्रः, स्कृताध्ययनविभागः,
हैदराबादविश्वविद्यालयः,
हैदराबाद, तेलंगाना, भारत

# सङ्गीतवैद्यकीयम् – त्रिदोषाणामुपरि स्वराणां प्रभावः

**आवीरलालगङ्गोपाध्यायः**

**DOI:** https://doi.org/10.22271/23947519.2021.v7.i6c.1571

**सारः**

पत्रेऽस्मिन् सङ्गीतरत्नाकरदिशा गीतेन सह रससम्बन्धः समालोचितः। तत्र च तेषां वैद्यकीयशास्त्रेण सह सम्बन्धः परिकल्पितः। येन हि कीदृशगीतस्य कस्मिन् दोषप्रकोपने प्रयोगः साधुः इति ज्ञायते। अत्र काव्यशब्दसहकृतगीतं विहाय प्रचलितरागसम्बन्धं च हित्वा केवलगीतप्रकाशकत्वं स्वराणां चिन्तितम्। एषा किल प्राथमिकी चिन्ता अस्मिन् प्रसङ्गे। एतत्सूत्रमादाय अग्रेऽपि स्यात् गीतरसबोधप्रयत्नः इति पत्रस्यास्य प्रमुखलक्ष्यम्।

**शब्दकुञ्चिकाः** सङ्गीतरत्नाकरः, स्वरः, रसः, दोषः, रागः

## उपक्रमणिका

अतलस्पर्शित्वभावस्य गीतरत्नाकरस्य अकल्पनीये आकरे कानि वा सन्ति रत्नानि अमूल्यानीति आबहोः कालात् प्रवर्तमानः यत्नः विपश्चिद्भिः। वर्तमाने च काले प्रवर्तितमस्ति गवेषणं सङ्गीतस्य वैद्यकीयक्षेत्रे प्रयोगस्य। पाश्चात्ये च कृतभूरिपरिश्रमाः वैज्ञानिकाः विषयेऽस्मिन्। ननु नास्ति शास्त्रेषु संगीतस्य वैद्यकीये प्रयोगे मानमिति चेत् मूढोस्ति स जनः एवम् उच्यमानः। यतो हि रुदन्गीतामृतं पीत्वेत्यादि शास्त्रवचनं सङ्गीतस्य मनआवर्जकत्वे मानम्। किञ्च, ज्ञानेन शृणोति गीतमिति वरमपि अज्ञातविषयास्वादे बालेऽपि तत्प्रभावात् मनआवर्जकत्वं स्वतःसिद्धं गीतस्येति निश्चितम्। [1]

ननु भवतु मनसः आवर्जकत्वमिति वैद्यकीये कथं गतिः तस्य इति चेत् परिष्क्रियते यत् मनसः पाञ्चभौतिके शरीरे अवस्थितेः तस्योपरि प्रभावः शरीरस्य विविधविकारं जनयतीति प्रत्यक्षतया एव ज्ञायते। यथा श्मशानमार्गतः प्रत्यागतः जनः रात्रौ स्वपितुमेव न प्रभवति, परेद्युर्वा ज्वरोऽपि आगच्छति। भयस्य तु सर्वथा मानसिकत्वात्, ततः शरीरे ज्वरादीनाम् उद्रेकात् मनःशरीरयोः योगः

[1] अज्ञातविषयास्वादो बालः पर्यङ्किकागतः। रुदन्गीतामृतं पीत्वा हर्षोत्कर्षं प्रपद्यते। इति सङ्गीतरत्नाकरे, 1.1.28

प्रत्यक्षावधारणाधीनः इति निश्चप्रचम्। ननु अस्तु तावत् एवं सम्बन्धचिन्तनं, किन्तु साक्षाच्छास्त्रेषु नास्ति किल अस्य उल्लेखः इति चेत् संकेतो हि वरः। उल्लेखाप्रयोजने अनुल्लेखः, संकेतः नास्ति इति न किल वक्तुं कदाचित् शक्यते। तत्रभवद्भिः आलोडितशास्त्रसुधाम्बुधिभिः संकेतितमेव विषयम् अञ्जलौ स्वीकृत्य जगद्धिताय शास्त्रस्य प्रवर्तमानं कृतमिति अस्मिन्नपि विषये तदञ्जलिधृतशास्त्रसुधया बुधप्रदर्शितेनैव मार्गेण पाययितुं शक्नुमः निहितं तत् तत्त्वम्।

**आलापादिषु रसनिष्पत्तिः**

काव्ये नृत्ये च रसाभिव्यक्तिः स्पष्टतया सर्वेषां भवति। तत्र विभावादीनां सुप्रतीयमानत्वात्। गीतेऽपि काव्यस्यैव सद्भावात् रसनिष्पत्तिः तद्वदेव बोध्यम्। नृत्ये काव्यस्य प्रदर्शनत्वात् तदनुकूलाङ्गविक्षेपादिभिः रसः उद्भवति स्फुटम्। किन्तु आलापे रसस्य प्रतीतिः कथं भवतीति प्रश्नः।

विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिरिति भरतमुनेः प्रसिद्धं बहुचर्चितं च सूत्रम्। तत्र समेषामेव अवस्थितित्वात् रसनिष्पत्तिः वा एकस्य वा द्वयस्य वा सत्त्वादेव रसनिष्पत्तिः इति सुतरां प्रश्ने उत्तरति विश्वनाथकविराजः –

सद्भावश्चेद्विभावादेर्द्वयोरेकस्य वा भवेत्॥

झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते। इति। [2]

अनेन स्पष्टं यत् एकस्यापि कस्यचन सत्त्वात् अन्येषां बुद्धौ आगतिः फलति।

**प्रस्तार 1:** सङ्गीतरत्नाकरदिशा स्वररससम्पर्कः

| स्वराः | विनियुक्तरसाः |
|---|---|
| षड्जः | वीरे अद्भुते रौद्रे च |
| ऋषभः | वीरे अद्भुते रौद्रे च |
| गान्धारः | करुणे |
| मध्यमः | हास्ये शृङ्गारे च |
| पञ्चमः | हास्ये शृङ्गारे च |
| धैवतः | बीभत्से भयानके च |
| निषादः | करुणे |

[2] साहित्यदर्पणः, 3.16½-17½

कश्चन यदि दरबारीकानडारागे ध्रुपदालापं [3] करोति तर्हि कथं तत्र रसास्वादः भवतीति अनुसन्धित्सायां न भवति इति वक्तुं न जातु शक्यते प्रत्यक्षानुभवात्। अस्य परिष्करणात् प्राक् सङ्गीतरत्नाकरे उक्तं षड्जादीनां रसे विनियोगत्वं प्रस्तारेण प्रदर्श्यते [4]–

अथ दरबारे वादिस्वरः भवति ऋषभः, संवादी च पञ्चमः। [5] वादिस्वरस्य प्राचुर्यात् तद्भूयिष्ठत्वात् प्रदत्तप्रस्तारदिशा वीरे अद्भुते रौद्रे वा प्रयोगः फलति। पञ्चमस्य संवादित्वात् ऋषभस्य परमेव तस्य स्थानात् हास्ये शृङ्गारे वा फलति प्रयोगः। दरबारकानडारागस्य अस्ति गम्भीरत्वम् इति लक्ष्यविदाम् [6] अस्ति सुविदितं तथ्यम्। नैन सोँ नैन मिलाये रखो [7] इत्यादिख्यालरचनासु यः शृङ्गारः दृश्यते सोऽपि पञ्चमस्य तस्य विनियोगस्वभावात् फलति। किन्तु तत्र बोद्धव्यं यत् वादिनः प्राचुर्यवशात् गाम्भीर्यस्य छाया निर्विवादं भवति।

ननु नैन सोँ नैन इत्यादिरचनासु गाम्भीर्याभावात् कुतः शृङ्गारे अपि गाम्भीर्यं वीरादीनाम् आंशिकानुभवः इति चेत् सत्यम्। मास्तु काव्ये तथाभूतत्वं, तत्र नास्ति अस्माकम् अत्यन्ताग्रहः।

[3] ध्रुपदस्य ग्रहणं तत्रैव आलापस्य दीर्घत्वात्। ख्याल् इत्यादिषु खलु स्वल्पकालिकत्वात् ध्रुपदस्य आलापप्रसङ्गे गौरवम्।

[4] सङ्गीतरत्नाकरः, 1.4.60

[5] आसावरीसुमेलाच्च जातो रागः सुनामकः। कर्णाटाह्वयको लक्ष्ये प्रौढालापार्ह उत्तमः॥

ऋषभः सम्मतो वादी संवादी पञ्चमो मतः। गानं सुनिश्चितं चास्य तृतीयप्रहरे निशि॥

अपभ्रंशस्तु कर्णाटशब्दस्य कानडा जने। दरबारीति यवनैर्गीतत्वाद्राजसंसदि॥ श्रीमल्लक्ष्यसङ्गीतम्, पृ. 163

[6] पत्रेऽस्मिन् बहुवारं लक्ष्यविच्छब्दस्य प्रयोगः स्यात्। तत्र कारणं विष्णुनारायणभातखण्डेमहाभागः स्वकीयस्य लक्ष्यसङ्गीतग्रन्थे पूर्वपूर्वग्रन्थकारान् उद्धृत्य सुष्ठु प्रतिपादयति यत् सर्वे एव लक्ष्यं दृष्ट्वा एव शास्त्रं व्यरचयन्। तथाहि – पुण्डरीको भावभट्टो लोचनो हृदयस्तथा। लक्ष्यमार्गमनुसृत्य स्वस्वग्रन्थानकुर्वत॥इत्यादिकम्। (श्रीमल्लक्ष्यसङ्गीतम्, पृः- 3-6)

[7] नैन सोँ नैन मिलाए रखत ओ मनवा मोरा चाहत तुमी सो बालमुवा। सगरि रतीयात तू तो प्यारे रहीले काहू सौतिन के धाम मनरंग मीले बेन सोँ बेन। (ख्यालसङ्गीते बहुप्रचलिता रचना)

रागं गायामि, तत्र एतां रचनां प्रस्तौमि इति व्यवहारे रागस्य मुख्यत्वात् रचनायाः गौणत्वात् क्वचित् रचनागताभावादीन् अपि रागप्रभावः परिष्करोति।

ननु रचना गौणा इति किं मौर्ख्यमुक्तं त्वया इति चेत् तस्मादेव क्वचिदिति पदप्रयोगः। तेन स्पष्टतः रचनारागप्रयोगस्तु अनोखा लाडला [8] इत्यादिरचनायाम् अन्वेषणीयः। रचनायाः प्राधान्यं भजनादिषु बोद्धव्यम्। तत्र कृष्णभजनं गायामि इत्यादय एव व्यवहाराः। कस्मिन् रागे करिष्यति इति आकाङ्क्षायामेव रागं वदति, नोचेत् तदपि न वदतीति दरीदृश्यते।

ननु आलापे उच्यमाने रचनादिषु गतिः कथम् इति चेत् कृपया धैर्यं सेवताम्। अत्रैव अस्माभिः मूलस्रोतं प्रति गम्यते। एवञ्च रचनादिषु एवंविधा स्वरस्य गतिः नूनं स्वरगतां कामपि शक्तिं निर्दिशति यदाधारेण शास्त्रकाराः अस्य स्वरस्य एवंविधरसे विनियोगः इति निश्चयं कुर्वन्ति। सा शक्तिरपि नैसर्गिकीति अवश्यं ज्ञेयम्।

आलापे तु नास्ति काव्यभावबाधा। तत्र समुद्र इव स्वरसमूहः एव विराजते। नियमत्वेन रागस्य वैशिष्ट्यमेव लसति। तदाधारेण रागस्य मूलं यत् चारित्रिकवैशिष्ट्यं तत् आदाय स्वस्य उपस्थापनं प्रस्तौति। स्वरान् सुरतां प्रति गमयति गायकनिष्ठचित्तवृत्तिरेव। यदि लौकिकतापतप्तः कश्चन गातुम् उद्यतः तस्य चित्तवृत्तेः शोकमयत्त्वात् कारुण्यं प्रस्तुतौ स्यादेव। एवञ्च उत्साहप्राचुर्येण गानावसरे तद्भावः प्रस्फुटितः भवति। एवमेव अपरासु चित्तवृत्तिषु अपि अवधेयम्।

ननु दरबारीरागे सरिगमपधनि इति सप्तानामेव स्वराणां सत्त्वात् आलापे कस्यचन एव रसस्य उद्रेकः स्यात् इति चेत् बाढमुक्तं किन्तु परिष्कारः अत्र विधेयः। काव्यस्य रसानुभूतौ वस्तुनः स्पष्टत्वं व्यक्तत्वं मूर्तत्वं वा स्वतः भवति। किन्तु केवलस्वरालापस्य विमूर्तता तत्र तत्त्वतः रससिद्धौ प्राचीरकल्पा तिष्ठति। अत्र एवमवधेयं यत् यथा वाक्यानां समूहे महावाक्यत्वं भवति, तेन च भहाभारतादौ अखण्डतया शान्तादिरसस्थितिः इति निर्णयः, तद्वदत्रापि सत्त्वेष्वपि समेषु स्वरेषु समेषां समापाते बाधकाः मुख्यतः त्रिविधा भवन्ति। तथा हि – गायकवादकचित्तवृत्तिः, वादिसंवादिस्वरव्यवस्था, सङ्गीतपरम्परायाः लक्ष्यैकनयनत्ववशात् आप्तानां लक्ष्यविदाम् अनुभवश्च।

तेन गायकादिचित्तगतशोकः दरबारस्वरैः निर्गतः श्रोतृचित्तं व्याकुलीकुर्वन् करुणरसतया भासते। वादिसंवादिनां खलु अन्येभ्यः प्राचुर्यात् तन्निष्ठरसमयत्वस्य अधिकविकासः सामान्यमेव। तथा हि दरबारीरागे ऋषभस्य वादित्वात् वीरादिरसे विनियोगत्वं वर्तते। अस्मिन्नेव विषये लक्ष्यं दृष्ट्वा स्पष्टीकरणं जायते। लक्ष्यैकनयनत्वात् स्वराणां विशिष्टचलनादिकं तु गुरुसकाशादेव अवगन्तव्यम्। तेन सधनिप इत्यादिविशिष्टचलने स्वरनिष्ठरसाभिव्यक्तिः स्यात् इति तत्त्वम्।

ननु किमिदं स्वकपोलकल्पितं हि बहुधा विस्तार्यते इति चेत् स्थैर्यमाचर। अस्ति तावत् नाट्यशास्त्रे षाड्ज्यादीनां जातीनां रसे विनियोगत्वम्। तत्रापि यस्यां जातौ यस्य ययोः वा स्वरस्य स्वरयोः प्राधान्यं तत्र तन्निष्ठरसोद्रेकता वर्तते इति निश्चयः। यथा च तत्र भरतोक्तिः –

षाड्जी त्वथार्षभी चैव स्वस्वरांशपरिग्रहात्। वीररौद्राद्भुतेष्वेते प्रयोज्ये गानयोक्तृभिः॥ [9]

ननु उक्तं त्वया रागमाश्रित्य अधुना किमिदं जात्यादिकं यत्किमपि ब्रूषे इति चेत् अधिकत्वरा तव, उच्यते सर्वम्। अत्र जातीनां लक्षणं कुर्वन्ति तत्रभवन्तः अभिनवगुप्तपादाः जातिर्नाम स्वरसमूहमात्रम् इति। [10] विशिष्टतया तु तैरेव अभिनवगुप्तपादैरुक्तं – स्वरा एव विशिष्टसन्निवेशभाजो रक्तिम् अदृष्टाभ्युदयं च जनयन्तो जातिरिक्युक्ताः इति। [11] ननु षाड्ज्यादीनाम् अष्टादशजातीनां स्वीकरः यत् मुनिना कृतं तदत्र कथं साधयिष्यसीति चेत् युक्तम्। षाड्जादीनां वैशिष्ट्यमात्रम् अत्र अनुसन्धीयते। न तु षाड्ज्यादि। जातीनाम् इदानीं लक्ष्याप्राप्तेः। ननु रागम् एव स्वीकरोतु, तत्रैव स्वरसमूहः अस्त्येव इति चेत्

---

[8] अनोखा लाडला खेलन को मांगे चंदा।
हाथत चंदन और रारि करत है मन में भयो रि आनंद। (प्रचलितरचना ख्यालसङ्गीतस्य)

[9] नाट्यशास्त्रम्, खण्डः-4, 29.2

[10] तदेव, खण्डः-4, पृः-76

[11] तदेव, खण्डः-4, पृः-42

रागाणाम् आनन्त्यात् केवलस्वरस्वीकारे वक्ष्यमाणस्य इष्टस्य साधने च लाघवात्। तत्र इष्टं प्रति जिगमिषायामेव पूर्वस्य आलापप्रसङ्गस्य निष्कर्षमिदानीं कथ्यते।

आलापे किल व्यभिचारिभावस्य रोमाञ्चाश्रुपातस्तम्भीभावादेः अनुभवात्, तदा च श्रोतृचित्ते आगतस्य तदनुकूलानुभावादीनाम् उद्भवात् रसनिष्पत्तिः। ननु अलीकं हि उक्तं, किं तावत् स्वकपोलकल्पितं वस्तुजातं चिन्तयित्वा रसास्वादं करोति जनः इति चेत् उच्यते, चिन्तयित्वेति न, अनुभूय इति वदतु। स्वकपोलकल्पितं न, चित्ते उद्भासितं वस्तु स्वतः आगच्छति। वस्तुतः इदमत्र निश्चितं वक्तव्यं यत् आलापात् रसास्वादनं प्रौढस्य एव भवति। श्रोतॄन् च आस्वादयति रसं प्रौढः गायक एव। किन्तु तत्रैव यदि श्रवणस्थानं गानस्य अनुकूलं भवति तदा रसास्वादः अतिसामान्यस्यापि द्राक् जायते। यथा यमनरागः सायं तैलदीपालोके गीयते चेत् तत्र भावप्रकर्षः रसप्रकर्षः च अभिवर्धते इति लक्ष्यविदां समयः।

एवम् आलापविषयः सर्वेषु एव चिन्तनीयः। अपि च विशिष्टरागप्रस्तुतिहीने अपि तथैव इति तत्त्वतः लक्ष्यतः च ज्ञेयम्। लक्ष्यतः इति मिश्ररागादितः इति बोध्यम्।

तेनात्र एका प्रक्रिया निर्गता। सा हि – स्वराणां चयनं, तेषां विशिष्टस्य समूहस्य जातिरूपस्य कल्पना, तस्य प्रयोगे च विशिष्टस्थानस्य चिन्तनम्।

## त्रिदोषैः सम्बन्धकल्पनम्

पञ्चभूतात्मके अस्मिन् शरीरे सन्ति कफपित्तवाताः त्रयः दोषाः इति वैद्यकसमयः। अत्र तावत् प्रत्येकं रसम् आदाय तस्य शरीरे प्रभावं विचिन्त्य दोषेण समं सम्पर्कः कल्प्यते। ननु किं वा असाधारणं दृष्ट्वा सम्पर्कः चिन्त्यते इति चेत् कस्यचन रसस्य आस्वादे शरीरे मुख्यतया प्राबल्येन च या अवस्था जायते, यस्य च स्थितिः शरीरे मुख्यतया अतिप्राबल्येन च अनुभूयते, तं शरीरगतविशेषम् आदाय सम्पर्कः कल्प्यते। तथाहि –

वीररसानुभवे उत्साहस्य स्थायिभावत्वात् तत्र च उत्साहस्य मानसिकव्यापारात्, क्वचिच्च देहोष्मप्रवर्धनत्वात् वातेन [12] पित्तेन [13] च सह अस्य सम्बन्धः।

अद्भुतरसस्य विस्मयस्थायिभावत्वात् विस्मयस्य च सर्वथा मानसिकव्यापारात् अत्र अस्य वातेन सहैव सम्बन्धः।

रौद्ररसस्य क्रोधस्थायिभावत्वात्, तस्य च शरीरे क्रोधोद्रेकात् तेजस्तत्त्वोद्रेकात् पित्तेन सह अस्य सम्बन्धः।

करुणस्य अनुभवे किल अश्रुपातादीनां बाहुल्यात्, तेन च क्वचित् श्लेष्माश्लिषकण्ठनासिकभूतत्वात् शरीरे जलतत्त्वं वर्धते इति कफेन सहैव सम्बन्धः। कफस्य तु पृथिवीजलमयत्वम् [14]।

हास्यस्य अनुभवे तु अङ्गविक्षेपादिचेष्टाबाहुल्यादस्यापि वातेन सह सम्बन्धः चिन्त्यते। व्यक्तकर्मत्वात् वातस्य। [15]

शृङ्गाररसस्य अनुभवे रसस्यास्य द्वैविध्यात् अनुभववैचित्र्यं जायते। विप्रलम्भस्य करुणांशसंयोगात् आस्वादने अश्रुपातादीनां दर्शनात् शरीरे जलतत्त्वस्य प्राबल्यात् कफेन सह सम्बन्धः अस्ति। पुनस्तत्र सम्भोगे तु मनसः आवेगादीनां बहु बाहुल्यं दृश्यते। रतेः च पूर्णतया संस्थितिः। अत्र सर्वथा मानसिकव्यापारात् रत्यादिषु अङ्गविक्षेपादीनां सत्त्वात् वातेन सह सम्बन्धं कल्पयितुं शक्यते।

बीभत्सभयानकयोस्तु उद्वेगावेगमोहादीनां प्राबल्यात् तेषां च नितरां मानसिकव्यापारात् अनयोः वातेनैव सम्बन्धः।

तेन पूर्वतनेन प्रस्तारेण सह संयोगेन नूत्नप्रस्तारः एवं प्रस्तूयते –

**प्रस्तार 2:** स्वररसदोषसम्बन्धकल्पनम्

| **स्वराः** | **विनियोगरसाः** | **सम्बन्धप्राप्तदोषाः** |
|---|---|---|
| षड्जः | वीरे अद्भुते रौद्रे च | पित्तं, वातः च |
| ऋषभः | वीरे अद्भुते रौद्रे च | पित्तं, वातः च |
| गान्धारः | करुणे | कफः |
| मध्यमः | हास्ये शृङ्गारे च | कफः, वातः च |
| पञ्चमः | हास्ये शृङ्गारे च | कफः, वातः च |
| धैवतः | बीभत्से भयानके च | वातः |
| निषादः | करुणे | कफः |

[12] नियन्ता प्रणेता च मनसः इति चरके सूत्रस्थाने विंशतितमे अध्याये।

[13] अग्निरेव शरीरे पित्तान्तर्गतः इति चरके सूत्रस्थाने द्वादशाध्याये।

[14] अम्भःपृथिवीभ्यां श्लेष्मा॥ अष्टाङ्गसंग्रहः, सूत्रस्थानम्, 20.3

[15] अव्यक्तो व्यक्तकर्मा च इति सुश्रुते निदानस्थाने प्रथमाध्याये।

एवञ्च पूर्वतनां चिन्तितां प्रक्रियां परिवर्त्य एवं प्राप्यते यत् – कस्य दोषस्य प्राबल्यं स्वरसमष्टौ इष्टं, तथैव स्वराणां जातिरूपचिन्तनपरकं चयनं, तस्य प्रयोगे च विशिष्टस्थानस्य चिन्तनम्।




**चित्रम् 1:** फललाभप्रक्रिया

ननु कफप्राबल्यस्य इच्छायां गान्धारस्य मध्यमस्य पञ्चमस्य निषादस्य च चयनम् इति चेत् न, शास्त्रमर्यादायाः लङ्घनं स्यात् तदा। न्यूनतया पञ्चस्वराः औडवजातिं रचयन्तः स्थातुमर्हन्ति, चतुर्ण्णां नास्ति स्थानम्। ननु तदा अन्यस्य दोषस्य आगमनम् इति चेत् न तथा चिन्त्यम्। यस्य स्वरस्य आकाङ्क्षा अस्ति तस्य आभीक्ष्ण्यं चिन्त्यम्। ननु तदा वादिस्वरत्वं तस्य, त्वया तु उक्तं यत् रागं न चिनोमि केवलस्वरम् इति चेत् अंशतः गृहीतं त्वया। वादिस्वरः भवति इति न हानिः। तस्मादेव जातिः इति शब्दस्य ग्रहणम्। नाट्यशास्त्रादिष्वपि जात्यादीनां वादिस्वरादिसत्त्वात्।[16] द्वितीयतः यद् उक्तं रागं न चिनोमि इति जातिषु रागच्छाया क्वचित् स्यादेव। तत्र रागाणाम् आनन्त्यात् चारित्रिकदृष्ट्या च अतिविशालत्वात् स्वीकारः न क्रियते इत्येव उक्तमासीत्। सर्वथा रागं न्यक्कुर्मः इति दुराग्रहः न जातु कृतः।

## उपसंहारः

ननु इतस्ततः आनीय सङ्ग्रहः न कर्तुं शक्यते इति अस्मच्चेष्टिते आक्षेपमाणानां समीपं गुरुपदशर्महालदारवर्याणां परिहारः एवात्र प्रस्तौमि। तथाहि गुरुपदवर्याः स्वकीये वृद्धत्रयीग्रन्थे (पृः- 269) आहुः –

"ननु स्वशास्त्रसंज्ञां विहाय परशास्त्रसंज्ञाग्रहणमन्याय्यमिति चेत् नैष दोषः। योगशास्त्रवेदान्तशास्त्रे अपि वैद्यागमबाह्ये भवतः, ततस्तु चरकसुश्रुताभ्यां योगोपसर्ज्जनीभूतब्रह्मनिर्वाणपञ्चीकरणादिविषयाः परिगृहीताः इति।" इति।

अत्रेदं बोद्धव्यं यत् पत्रमिदम् अव्यूहतया प्रस्तुतम्। अस्य प्रयोगे एव पूर्णता। तस्मात् रोगिनिश्चयः। तस्य च दोषनिश्चयः स्यात् प्रश्नोत्तरपत्रमाध्यमेन। ततः कल्पितस्य अस्य तत्त्वस्य प्रयोगः। अथ च अस्मत्संस्कृतेः तत्त्वमूलकत्वात् स्वकीयसंस्कृत्युद्भिन्नस्य च विषयस्यापि परम्परानुसारित्वं तत्त्वमूलकत्वं स्यादेव इति नीतिं मनसि निधाय विषयः अयं प्रपञ्चित इति दिक्।

## अनुशीलितस्थलानि


1. गुरुपदशर्महालदारः. (1991). वृद्धत्रयी नाम प्राचीनायुर्वेदशास्त्रेतिहासः. देहली: शारदाप्रकाशनम्.
2. भरतमुनिः. (2012). नाट्यशास्त्रम् (Vol. i and iv). (रविशंकरनागरः, Ed.) देहली: परिमल पाब्लिकेशन्स.
3. भातखण्डे, विष्णुनारायण (1991). हिन्दुस्थानी सङ्गीत-पद्धति (Vol. ix). (धरित्री राय, & असीमकुमार चट्टोपाध्याय, Eds.) कलिकाता: दीपायन.(वङ्गभाषायाम् अनुदितम्)
4. वाग्भटः. (2011). अष्टाङ्गसंग्रहः. (कविराजात्रिदेवगुप्तः, Ed.) वाराणसी: चौखम्बाकृष्णदासअकादमी.


[16] जातयोऽष्टादशेत्येवं ब्रह्मणाभिहितं पुरा।
तास्त्वहं वर्तयिष्यामि ग्रहांशादिविभागतः॥ इति नाट्यशास्त्रे अष्टाविंशतितमाध्याये नवत्रिंशत्तमश्लोकः। अंशपदस्य वादिपदपर्यायत्वम्।

5. विश्वनाथकविराजः. (2011). साहित्यदर्पणः. (कृष्णमोहनशास्त्री, Ed.) वाराणसीः चौखम्बासंस्कृतसंस्थानम्.
6. विष्णुनारायणभातखण्डे. (1934). श्रीमल्लक्ष्यसङ्गीतम्. पुण्यपत्तनम्ः आर्यभूषणयन्त्रालयः.
7. शार्ङ्गदेवः. (2011). सङ्गीतरत्नाकरः. वाराणसीः चौखम्बासुरभारतीप्रकाशनम्.
8. सुश्रुतमहर्षिः. (1945). सुश्रुतसंहिता. (नारायणरामाचार्यकाव्यतीर्थः, Ed.) मुम्बयीः निर्णयसागरः.
9. http://niimh.nic.in